

# Sri Bala Kavacham – Siddha Yamalam

# ॥ श्रीबाला कवचं - सिद्ध यामळम् ॥

The following is a rare amulet hymn (**Kavacham**) on **Sri Bala Tripura Sundari** from **Siddha Yamalam**.

वाग्भवं पातु शिरसि कामराजं सदा हृदि ।
शक्तिबीजं सदा पातु नाभौ गुह्ये च पादयोः ॥ १ ॥

ऐं क्लीं सौः वदने पातु बाला सर्वार्थ सिद्धये ।
जिह्वां पातु महाहंसी स्कन्ध देशे तु भैरवी ॥ २ ॥

सुन्दरी नाभि देशं तु शिरसि कमला सदा ।
भ्रुवौ नासा द्वयं पातु महात्रिपुर सुन्दरी ॥ ३ ॥

ललाटे सुभगा पातु कण्ठ देशे तु मालिनी ।
वाग्भवं पातु हृदये उदरे भर्ग सर्पिणी ॥ ४ ॥

भगमालिनी नाभि देशे लिङ्गे पातु मनोभवा ।
गुह्ये पातु महादेवी राजराजेश्वरी शिवा ॥ ५ ॥

चैतन्य रूपिणी पातु पादयोर् जगदम्बिका ।
नारायणी सर्व गात्रे सर्व काले शिवङ्करी ॥ ६ ॥

ब्रह्माणी पातु मां पूर्वे दक्षिणे पातु वैष्णवी ।
पश्चिमे पातु वाराही उत्तरे तु महेश्वरी ॥ ७ ॥

आग्नेय्यां पातु कौमारी महालक्ष्मीस् तु नैरृते ।
वायव्यां पातु चामुण्डा इन्द्राणी पातु ईशके ॥ ८ ॥

आकाशे च महामाया पृथिव्यां सर्व मङ्गला ।
आत्मानं पातु वरदा सर्वाङ्गे भुवनेश्वरी ॥ ९ ॥

---

**॥ इति श्रीसिद्ध यामळे श्रीबाला कवचं सम्पूर्णम् ॥**